# પ્રેમામ્ભોજમરન્દસ્તવરાજઃ

Premambhojamarandastavarajah

sanskritdocuments.org

March 16, 2019

# Premambhojamarandastavarajah

# પ્રેમામ્ભોજમરન્દસ્તવરાજઃ

## Sanskrit Document Information

Text title : premAmbhojamarandastavarAjaH

File name : premAmbhojamarandastavarAjaH.itx

Category : devii, radha, raghunAthadAsagosvAmin, stavAvalI, stavarAja

Location : doc_devii

Author : RaghunathadAsagosvAmi

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From Collected prayers by Raghunatha Dasa Goswami Stavavali

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 15, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 16, 2019

*sanskritdocuments.org*

# પ્રેમામ્ભોજમરન્દસ્તવરાજઃ

મહાભાવોજ્જ્વલચ્ચિન્તારત્નોદ્ભાવિતવિગ્રહામ્ ।
સખીપ્રણયસદ્ગન્ધવરોદ્વર્તનસુપ્રભામ્ ॥ ૧॥

કારુણ્યામૃતવીચિભિસ્તારુણ્યામૃતધારયા ।
લાવણ્યામૃતવન્યાભિઃ સ્નપિતાં ગ્લપ્તેન્દિરામ્ ॥ ૨॥

હ્રીપટ્ટવસ્ત્રગુપ્તાઙ્ગીં સૌન્દર્યઘુસૃણાઞ્ચિતામ્ ।
શ્યામલોજ્જ્વલકસ્તૂરીવિચિત્રિતકલેવરામ્ ॥ ૩॥

કમ્પાશ્રુપુલકસ્તમ્ભસ્વેદગદ્ગદરક્તતાઃ ।
ઉન્માદો જાડ્યમિત્યેતૈ રથનિર્નવભિરુત્તમૈઃ ॥ ૪॥

ક્લ્પ્તાલઙ્કૃતિસંસ્લિષ્ટાં ગુણાલીપુષ્પમાલિનીમ્ ।
ધીરાધીરાત્વસદ્વાસપટવાસૈઃ પરિષ્કૃતામ્ ॥ ૫॥

પ્રચ્છન્નમાનધમ્મિલ્લાં સૌભાગ્યતિલકોજ્જ્વલામ્ ।
કૃષ્ણનામયશઃશ્રાવવતંસોલ્લાસિકર્ણિકામ્ ॥ ૬॥

રાગતામ્બૂલરક્તૌષ્ઠીં પ્રેમકૌટિલ્યકજ્જલામ્ ।
નર્મભાષિતનિસ્યન્દસ્મિતકર્પૂરવાસિતામ્ ॥ ૭॥

સૌરભાન્તઃપુરે ગર્વપર્યઙ્કોપરિ લીલયા ।
નિવિષ્ટાં પ્રેમવૈચિત્ત્યવિચલત્તરલાઞ્ચિતામ્ ॥ ૮॥

પ્રણયક્રોધસચ્ચોલીબન્ધગુપ્તીકૃતસ્તનામ્ ।
સપત્નીવક્ત્રહૃચ્છોષિયશઃશ્રીકચ્છપીવરામ્ ॥ ૯॥

મધ્યતાત્મસખીસ્કન્ધલીલાન્યસ્તકરામ્બુજામ્ ।
શ્યામાં શ્યામસ્મરામોદમધુલીપરિવેશિકામ્ ॥ ૧૦॥

ત્વાં નત્વા યાચતે ધૃત્વા તૃણં દન્તૈરયં જનઃ ।
સ્વદાસ્યામૃતસેકેન જીવયામું સુદુઃખિતમ્ ॥ ૧૧॥

ન મુઞ્ચેચ્છરણાયાતમપિ દુષ્ટં દયામયઃ ।
અતો ગાન્ધર્વિકે હા હા મુઞ્ચૈનં નૈવ તાદૃશમ્ ॥ ૧૨॥

પ્રેમામ્ભોજમરન્દાખ્યં સ્તવરાજમિમં જનઃ ।
શ્રીરાધિકાકૃપાહેતું પઠંસ્તદ્દાસ્યમાપ્નુયાત્ ॥ ૧૩॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
પ્રેમામ્ભોજમરન્દસ્તવરાજઃ સમ્પૂર્ણઃ ।

---

*Premambhojamarandastavarajah*

pdf was typeset on March 16, 2019

Please send corrections to *sanskrit@cheerful.com*